ततो हेतौ पञ्चमी कृच्छ्रान्मुक्तः सत्वपरत्वे तृतीया कृच्छ्रेण विशेषेण मुक्तः। एतत्पञ्चम्या अलुक्स०।

**कृच्छ्रसान्तपन** पु०न० सम्यक् तपनमत्र प्रज्ञाद्यण् कर्म्म०। व्रतभेदे कृच्छ्रशब्दे विवृतिः।

**कृच्छ्रातिकृच्छ्र** पु० कृच्छ्रादपि अतिकृच्छ्रः अतिकष्टसाध्यत्वात्। व्रतभेदे कृच्छ्रशब्दे विवृतिः। [तथात्वम्।

**कृच्छ्रारि** पु०६त०। विल्वभेदे राजनि०। कष्टनिवारकत्वात्तस्य

**कृच्छ्रार्द्ध** पु० व्रतभेदे कृच्छ्रशब्दे विवृतिः।

**कृणञ्ज** पु० कुणञ्ज+पृषो०। कुणञ्जयशब्दार्थे राजनि०।

**कृणु** पु० कृ—बा०नु णत्वम्। चित्रकरजातौ त्रिका०

**कृत** सं शब्दे चुरा०उभ०सक० सेट्। कीर्त्तयति ते अचिकीर्त्तत् त कीर्त्तयां बभूव आस चकार चक्रे। कीर्त्तिः कीर्त्तनम् कीर्त्तितः कीर्त्तयन्। कीर्त्त्यते कीर्त्त्यमानः

**कृत** छेदे तुदा० पर० सक० सेट् मुचादि। कृन्तति अकर्त्तीत् कर्त्तिष्यति—कर्त्स्यति ईदित् कृत्तः कृत्तिः। "न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत्। विश्वासाद् भयमुत्पन्नं मूलान्यपि निकृन्तति" हितो०। प्रनिकृन्तति णिचि कर्त्तयति ते अचीकृतत्—त अचकर्त्तत्—त सनि। चिकर्त्तिषति "शिरोऽतिरागाद्दशमं चिकीर्त्तिषुः" माघः। कर्त्तनं कर्त्तनी कृन्तनम्। [चकर्त

**कृत** वेष्टे रुधा० पर० सक० सेट्। कृणत्ति कृन्तः अकर्त्तीत्।

**कृत्** पु० करोति प्रातिपदिकसंज्ञां कृ—क्विप्। १प्रत्ययभेदे कृत्त्वं च धातुप्रकृतिकत्वे सति प्रातिपदिकसंज्ञानिमित्तप्रत्ययत्वम्। धातोरित्यधिकारेण तद्विधानात् धातुप्रकृतिकत्वम् "कृत्तद्धितसमासाश्चेति" पा० तस्य प्रातिपदिकसंज्ञावत्त्वम्। अतएवोक्तमभियुक्तैः "उणाद्यन्तं कृदन्तञ्च तद्धितान्तं समासजम्। नामसंज्ञा भवेत्तेषां स्याद्युत्पत्तिस्ततः परम्" तद्धितव्युदासाय धातुप्रकृतिकत्वविशेषणम् तिङ्व्युदासाय प्रातिपदिकसंज्ञानिमित्तत्वमिति "कर्त्तरि कृत्" पा०। "गतिकारकोपपदानां कृद्भिः समासवचनं प्राक् सुबुत्पत्तेः" वार्त्ति०। "कृदभिहितोभावोद्रव्यवत् प्रकाशते" महाभाष्यम् "सप्तम्याः कृति बहुलम्" पा०। २कर्त्तरि त्रि०

**कृत** त्रि० कृ+कर्म्मणि क्त। १सम्पादिते २जनिते३अभ्यस्ते च। "कृतमोदनसक्त्वादि तण्डुलादि कृताकृतम्। व्रीह्यादि चाकृतं प्रोक्तमिति द्रव्यं त्रिधा बुधैः" कात्या० उक्ते ४ओदनादौ हविषि न०। "कृतमनुमतं दृष्टं वा यैरिदं गुरु पातकम्" वेणीसं० ५विहिते त्रि०। ६फले न०। ७सत्ययुगे न० तन्मानाद्युक्तं मनुना "चत्वार्य्याहुः सहस्राणि वर्षाणान्तु कृतं युगम्। तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः"। तेन ४८०० दिव्यवर्षास्तन्मानम् व्यक्तमुक्तं सू० सि० यथा "तद्द्वादशसहस्राणि चतुर्युगमुदाहृतम्। सूर्य्याब्दसङ्ख्यया द्वित्रिसागरैरयुताहतैः। सन्ध्यासन्ध्यांशसहितं विज्ञेयं तच्चतुर्युगम्। कृतादीनां व्यवस्थेयं धर्म्मपादव्यवस्थया युगस्य दशमो भागश्चतुस्त्रिद्व्येकसङ्गुणः। क्रमात् कृतयुगादीनां षष्ठोंशः सन्ध्ययोः स्वकः"। ततश्च मानुषमानेन१७२८००० वर्षास्तन्मानं। तदेतदुक्तं सि०शि०"खखाभ्रदन्तसागरैर्युगाग्नियुग्मभूगुणैः। क्रमेण सूर्य्यवत्सरैः कृतादयो युगाङ्घ्रयः। स्वसन्ध्यकातदंशकैर्निजार्क १२भागसंमितैः। युताश्च तद्युतौ युगं रदाब्धयोऽयुताहताः" मू० 'खखाऽभ्रदन्तसागरैरिति। रविवर्षाणां लक्षचतुष्टयेन द्वात्रिंशत्सहस्राधिकेन चतुर्गुणेन कृतं नाम प्रथमो युगचरणः १७२८०००। त्रिगुणेन त्रेतासंज्ञो द्वितीयो युगचरणः १२९६०००। द्विगुणेन द्वापराख्यस्तृतीयः ८६४००। एकगुणेन कलिश्चतुर्थः ४३२०००। किंविशिष्टा एते युगचरणाः। स्वसन्ध्यकातदंशकैर्निजार्कभागसंमितैर्युताश्च। युगचरणप्रमाणस्य यो द्वादशांशस्तत्प्रमाणा तस्य चरणस्य सन्ध्या। सा चरणादौ भवति। तावांश्च सन्ध्यांशः। स चरणस्यान्ते। एवं स्वसन्ध्यासन्ध्यांशैः सह एते युगचरणाः कथिता इत्यर्थः। ततश्च कृतादौ सन्ध्यावर्षाणि१४४०००। कृतान्ते सन्ध्यांशः१४४०००। त्रेतादौ सन्ध्या १०८०००। त्रेतान्ते सन्ध्यांशः १०८०००। द्वापरादौ सन्ध्या७२०००। द्वापरान्ते सन्ध्यांशः ७२०००, कलेरादौ ३६००सन्ध्या तदन्ते ३६०० सन्ध्यांशः" प्रमि० "परैश्चतुर्भिः सुकृतैः स्थिरीकृते कृतेऽमुना के न तपः प्रपेदिरे" नैष०। २२४ पृ० अयशब्ददर्शिते ८चतुरङ्कयुक्ते पाशकभेदे १०स्तोमभेदे च तत्रैवोदा० ११पर्य्याप्ते त्रि० मेदि०। भावे क्त। १२क्रियायां न० कृतपूर्व्वी कटम् कृतपूर्व्विशब्दे विवृतिः। १२दासभेदे पु० कृतदासशब्दे विवृतिः १४चतुःसंख्यायां "युग्माग्नी कृतभूतानि" ति०त० निगमः। १५साधिते पक्वे त्रि० कृतान्नम्।

**कृतक** त्रि० कृतं करणं भावे क्त तत आगतः कन् कृतमेव स्वार्थे क कृन्तति स्वरूपं कृत—क्वुन् वा। १कृत्रिमे करणाज्जाते। कृत्रिमस्य स्वरूपाच्छादकत्वात् तथात्वम्। "यद्यत् कृतकं तदनित्यमिति न्यायः। "शब्दोऽनित्यः कृतकत्वात्" मुक्ता० "एतेन विधिना छन्नः कृतकेन